(1)

अध्याय ७वा

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2)

कै॰ टी॰ १

श्रीगणेशाय नमः ॥ एकावोढेति निर्देशस्य समानत्वादिति अनेन संदेहबीजं साधारणधर्मदर्शनमुक्तं ननूभयोरप्याश्रयणमस्त्व
तत्राह भिन्नार्थत्वादिति । नह्येकशब्देन भिन्नयोरभिधानमुपपद्यत इति भावः नन्वस्यादिवदेकशेषोस्त्वत आह एकवचने
ति । समाहारे एकशेषस्तु नास्त्येवेति भावः लिंगमस्तूभयोरस्त्वीति न तेनापि निर्णय इत्याह हलादिरिति एतेन निषादस्थपत्यधि
करणन्यायेन तत्पुरुषत्वनिर्णय इत्यपास्तं इतरः किं नो भिन्नबहुव्रीहिपक्षे इत्यतो छित्वासंभवादिति भावः ॥ स्वरादपि न निर्णय इ
त्याह स्वरस्येति न च हेतुरेकश्रुत्यावेति । एवं च एकश्रुत्या पाठपक्षे स्वरादुरवधारणा इति भावः किंचात्र इति प्रश्नविषयः प्रश्नो
नुपपन्नोत आह द्वयोरिति । ननु बहुव्रीहौ त्यदाद्येकावृत्ते प्रथमताभावात्कथं छित्वमत आह प्रथमत्वाभावेपीति योगविभाग
एकावोढ इत्येवं रूपः बहुव्रीहिशब्दस्य निर्देशाभावादाह बहुव्रीहाविति बहुव्रीहिपदेन तत्संज्ञकमुच्यते ॥ निर्देश उच्चारणं प्रतिपाद
नं वेत्यर्थः ननु स्वपदार्थप्रधानत्वेनांतरंगत्वात्तत्पुरुषो न्याय्योत आह व्याप्तीति । व्याप्तिमेव दर्शयति बहूनामेति । तत्राद्वूसेक
शेषग्रहणमिति । सौत्रो विभक्त्यंतानामेकशेष इत्यभिमानः अनेकमिति । तत्पुरुषस्य तु एकमेव लिंगं दीर्घ इत्यादौ इति भावः वस्तुता
व्यपदेशिवद्भावेन सिद्धत्वात्तस्य लिंगत्वमेव नास्ति । नन्वस्याधिकारत्वात्तत्र तत्र कार्ये निर्देशोस्त्वेवेति तत्प्रश्नानुपपत्तिरत आ
ह विधिमेवेति । स्वार्थत्वे संभवति पारार्थ्यकल्पनं न युक्तमिति भावः भाष्येकस्येत्स्यधातोः प्रातिपदिकस्यैवेत्यर्थः नायं विधि
रिति विधित्वे हलि दिधानो इत्यादेर्विधेयानिर्देशात्प्रवर्त्तने वसिद्धत्वाच्च वैयर्थ्यं स्यादतो धिकार एवायमिति भावः ॥ व्यवस्था

श्री राम॰ १

(2A)

नमितिधातोरेकाचस्तस्मैवमर्थ विशेषस्याव्यवस्थितिरित्यर्थः जजागारेत्यादिसिद्धये आह वैयधिकरण्येनेति । संभवत्सामानाधिकरण्येवैय
धिकरण्यस्याप्युक्तत्वादाह सर्वेति एकानेकाच्धात्वनुप्रयोगस्यार्थस्तदेवाह तस्मिन्निति अनेकाविषयत्वेत्यनेनव्याप्तिन्यायः सवित : पुनस्त
स्मिन्वैयधिकरण्येनत्वानेका विषयतालक्षणास्य भवतीत्यनुक्तत्वात् । अनेकाविषयत्वात्वलक्षणस्येति क्वचित्पाठः तत्रान्वयश्चिंत्यः वैयधि
करण्याश्रयज्ञापकमप्याह प्रथमस्य हरणात्संबन्धिनि इति भाविविष्यतीतिडानियमव्यवहार विषयो भाविविष्यतीत्यर्थः आद्यप्रथमत्वे चाश्रयमत्वे चेतस्या
क्रमेति शेषः किमुक्तमिति पृच्छति किमिति तत्राह व्यपदेशिवदिति सप्तमीति [illegible] काकाप्रश्नः नवकव्युत्पत्तेनकर्मसु तत्रयपादिउक्ते वेति ।
आद्यंतवदितिसूत्रेइति शेषः यत्तेचारेशेतित्यादेश प्रत्यययो [illegible] स्यायंशेवयवषष्ठीसत्वात्परत्ववक्ष्यादित्यादौ सकार स्यात्र स्य
प्रत्ययस्यावयवत्वार्थमित्यर्थः वचनेनालिवदुवचननिर्वधनत्वाभा [illegible] व्यवहाराच्छास्त्रेपि सुरव्यप्रथमाप्स्वान्सिद्धं तत्र कार्यमित्यर्थः
अवस्थाभेदाश्रयइतिअवस्थाकृतभेदाश्रयइत्यर्थः भेदेनेति [illegible] भावस्थापूर्वावस्थातो भेदेननिर्दिश्यत इत्यर्थः । नन्वेवं भेदस
तिप्रत्ययविज्ञानस्यादौ हेतुमाह एकमेवेति नियथान्यत्र दृशा [illegible] भानभावः तु स्यवस्थापिनेति तु । द्विकल्पितेत्यर्थः । अवस्थाभेदे
कृतराणाद्युपाधिसंबंधरूपा ननु वास्तवमात्मन्यवस्थाभेदोस्तीति भावः वस्तुतः । शालापुत्रकस्य शरीरमित्यादिवस्तुशब्दस्य विकल्पात्म
कंज्ञानंशब्दज्ञानानुपातीवस्तुशून्योविकल्पः पुरुषस्य चैतन्यमितिवत्कृतेएका च त्वज्ञानमपि तथैव इति दीर्घ इत्यादिस्तापकाद्योक
निरुद्धत्वात्तत्रास्यापि भ्रान्त्या यकार्येनिमित्तताश्रयत्वेत्यादि फलंश्चिंत्यइत्यादौ तन्न वेन्सत्वे उक्तेन धनपनोह एवं पञ्चेति निषेधेभे

(३)

कौ·टी·
२

हार्द्धे इति भाविप्रयोगांतरस्यापेक्षया प्रथमव्यवहार इति भावः प्रथमगर्भेण गतेति प्राग् स्तनाभ्यामग्रेऽसोयमाणानां वायंव्यवहारः गर्भोऽ
पत्यं साधर्म्यादिति। अपत्यांतराभाववत्कालिकपत्यत्वेन स्यादृश्यं तस्माद्वा एकस्मिन्नपि लोके व्यवहारो दृश्यत इत्यन्वयः नन्वेवं सति
गौणत्वाद्द्वस्य ग्रहणं न स्यादित्यत आह प्रसिद्धत्वाद्वेति द्वितीयसंज्ञाद्वयस्य लब्धत्वाद्गौणत्वं दुर्वारमत आह स्वत्यपि वा गौणत्वेऽपीति· न
न्वेधिकारार्थत्वादस्य विभागोऽविभागेवान विशेषेण आह तत्राहीति। वाक्यभेदेन संबंधप्रकारमाह तस्मादिति नियमार्थमिति प्र
थमादिप्रथमसंज्ञा वक्त्रि विषये इति भावः। नन्वेकदरकारः कथं वर्द्धमानभवः स्यादित्याशंक्याह दृष्टांतेनोपपादयति यथेति इत्यनाम्नि त्येति
अ सहायेपेव व्यपदेशा वक्ता वेदेत्य नाम्निस्यापि वोध्यः अ। ध्यानवत्त्रेव्य न देशिवदेकस्मिन्नित्युक्ते· तस्मा अपारगामापत्त्या वेदना
[illegible]
नाम्नाः सुकरत्वादित्यर्थः सति संभवे [illegible] असति तु प्रकारांतरेणापीति भावः अन्यथेति। ज्ञापकमिदं विंस
पर्युदासे नैवार्थवत्त्वलाभे परिभाषाया अनुपयोगात् अर्थवत्वग्रहणस्य विशिष्टार्थग्रहणमावश्यकत्वाच्चेत्याहुः अर्थवत्परिभाषा
नाश्रयणे हेत्वंतरमाह धातोरर्थवत्वेनेति अर्थवत्वाभावात् लदवषवृद्धस्यानुक्तेऽवयवानर्थक एव प्रतीयतेइति भावः अत एव जजागोरत्वा
देजागिस्वस्याहत्वे भवति· न च सर्वेषां द्वित्वमेकत्रैव प्रयोगे युगपच्चोद्यते उत प्रयोगभेदात्पर्यायेणावेत्याद्यः पक्षो नोपपद्यते प्रमित्सनु
ध्यानयोरसंभवादित्याह· अत्र चेति तत्र प्रमित्सनावद्युगपदसंभवमाह नत्वेक इति। शाकेपोप्रस्तितु मिति निष्पमात्तु मित्स्यः एकस्यतेद्वित्व

श्रीरामः
२

(3A)

स्येन प्रमाकाले ऽपरस्य नेद्धि शिष्टेनप्रमाप्याऽसंभवादिति भावस्तत्रहस्वपदस्येत्यादिनायुगपदनुष्ठानासंभवादयिपर्यायप्रसंग इत्याहएक
स्पचेतिलस्यभेदात्तुनः प्रसक्तिरसंभवारपाति अथोपिद्धिरुक्तत्वादिति। एवंचनदेशमात्रायलक्षणेलक्षणस्येतिन्यायप्रवृत्तिरितिभावस्तदाह अ
वृत्तत्वाल्लक्षणस्येति अनभ्यासस्येति निषेधाच्चेत्यपिबोध्यं वाच्यः क्रमप्रवृत्तित्वाच्चयुगपदनुष्ठानाभाव इत्यपिबोध्यं। ननुरूपासिद्धेरयस्य
सत्त्वाद्व्यवधानेसतीत्ययुक्तमतआह रूपासिद्धेरितिहलस्वरप्राप्ताविति विषयेस्वरविधयेएतदेवेतिभावः एतेनस्वरोदयपक्षेवि धौव्यंज
नस्याविद्यमानत्वायतद्यवश्यकं अतएवशोभकेशोकेमित्यादावनुरागो रेत्नसिद्धः एवंचइत्यैवव्यवस्थापनादित्येयुक्तमित्यपास्तं॥
अत्रचजकारादेर्हलः स्वरप्राप्त्यभावाद्विद्यमानत्वमेवेतितेनव्यवधानात्सवराजिद्धिरितिबोध्यं पूर्वोक्तेनेतिलक्षणेलक्षणस्येतिन्यायेना
नभ्यासस्येतिनिषेधेनचेत्यर्थः अन्येषामिति अवेष्टवांतराणामित्यर्थः नतुक्तं भाष्यसमुदायेकाचइतिसमुदायरूपएकाच्समुदायेका
च्तस्यशास्त्रं नद्विषयं शास्त्रमित्यर्थः धातोः प्रथमेकाच्त्वाद्वचनासतिबाधकेशास्त्रव्यापारादितिभावः भाष्येतस्यसमुदायइति
जातावेकवचनं तेषांसमुदायइत्यर्थः तत्समुदायेकाच्त्वादितिलुप्तपंचमीतेषांसमुदायस्यैकाच्त्वमाश्रित्यद्वित्वप्रवृत्त्यासिद्धमित्य
र्थः ननुसमुदायद्वित्वेपिअवयवानामप्येकाच्त्वात्कथंनशास्त्रहानिरतआह। समुदायइति यथासहलरनुष्ठितश्रेयाज्ञादिनाशायत्र
योपकारात्फलाभावात्पृथगननुष्ठानमेवंसमुदायद्विरुक्तेऽवयवानांनफलंभावात्पृथगननुष्ठानमितिभावः एतदेवस्पष्टयितुंभाष्ये
चोद्यसमाधानेइत्याहशास्त्रेणेति यद्यपीति अवयवेऽद्विरुच्यमानेइतिच्छेदः समुदायेद्विरुच्यमानेइतिपाठः क्वचित्। णिलिटकारस्य

(५)

के॰टी॰
३

द्वित्वेवापरेक्षावृद्धावेना द्वित्वेपिमुख्यो द्वित्वाभावान्न हल्लादिः शेषेणाभ्यासटकारनिहत्तावनउपधाया इति वृद्धावाटेत्यस्यासिद्धेर्भाष्येआ
वत्तुरित्याद्युक्तेः तच्चयथावेत्यस्याप्युपलक्षणमित्याह अनेकस्यवेति अनडुगोसंविज्ञानो बहुव्रीहिरिति भावः तस्यसंविज्ञानमिति आनयनाद्यु
न्वयित्वेनज्ञानमित्यर्थः गुणोविनिवृत्ताद्यः संविज्ञानमित्युत्तरंबोध्यं संनिहिता वृश्चोषोगास्येत्तिवद्बहुव्रीहिः विशिष्टसंबंधाश्रयणोति। संयो
गसमवायान्यतरसंबंधाश्रयणोत्यर्थः तदन्यतरसंबंधसंबंधमन्यपदार्थेकर्तृकेन चित्रगुबहुव्रीहिरिति सोनिष्फलितं। विशिष्टसंबंधाश्रयणे इति
पाठः क्वचित् अत्रसत्यपिस्वस्वामिभावे इति पाठः सत्यपीति तदर्थः वासः संयोगाश्रय इति प्रमास्योमनो शिववद्बहुव्रीहेरप्रविषयाइति
भावः असत्यपीति पाठस्तु मनुष्यत्रस्यभाष्यस्वरसेयाविरुद्धः यद्वातत्र पाठे वासः संयोगाश्रय इत्यस्यवासः संयोगमूलकआधारा
धेयभावेसमवायसंबंधेच बहुव्रीहिरित्यर्थः केनचित् बहुव्रीहिरित्युक्तं तत्रकेनचिदित्यस्य फलमाह इहत्विति उपलक्षणत्वेनेति दर्शनक्रि
या कर्मोपलक्षणत्वेनेत्यर्थः नेयादर्शनाक्रियया नानिर्वासामिपुक्तानि विषयमत पासंबद्धानीत्यर्थः नावश्यं तत्रैति वार्तिपदार्थानुदर
र्शनक्रियायामुपलक्षणत्वाश्रयणादिति भावः स्वस्वामिभावविशिष्टमिति निर्देशांतरस्याभिरूपिगो मित्तत्वसंभवादिति भावः। सर्वेष्या
त्राततृगुणसंविज्ञानत्वमेवेति नास्यपर्यवसानेन तु तद्गुणसंविज्ञानत्वमेवेत्याह इहत्विति उपलक्षणाभावेनापी नियमकोऽदृष्टस्तस्य द्वि श्री एम:
त्वमित्येवमुक्तावपीतिभावः तत्रापि तद्गुणत्वमेव किंपुनरत्रेति नात्रसर्वेपदरूढयोपपत्तिंस्तत्राभरेर्द्दशेषपति। सोयमुक्तार्थाधान्नदेहस्यसमरव्ये ३
यानुक्तेस्तत्सापेक्षत्वादिति भावः तन्निबंधनानितन्घटितानि संख्येयेइतिआदरणात्संख्याः संख्येयइत्युक्तेरितिभावः स्याद्न्याय्येया।

भावायोगादिति॰ अत्र संभवान्नष्टी स्थानेइत्यस्य प्राप्नुवन्नेरिति भावः तत्कार्यकारी हि तत्स्थाने भवति न हि शाङ्कां प्रबोधं क्रियाकर्तुमीष्टे
इति नस्थान्यादेशत्वासंभवइति तात्पर्यं। ननु कृद्योगाभावात्कथं कर्मणि षष्ठीत्यत आह उच्चारणशब्दाध्याहारेणेति एकाचो द्वेउच्चा।
रणेइत्यनेन ह्यावेकेइशेषमिति भावः शेषलक्षणावेत्यभ्युच्चयः नन्वाटिटदित्यत्र परत्वात्तत्तिलोपे स्थानिवत्वान्न द्वित्वमिति न दोषो
न आह आगिति। त्वदुक्तप्रक्रियायां द्वाभ्यामेइकोऽसम्भवेणेन स्थानिद्दित्यर्थः द्विर्वचनेचीत्यस्य कार्यातिदेशत्वादिति भावः नच स्थानिव
द्भावादिति स्थानिवदादेशादित्यनेन नन्वयं णोरिति अत्रापि द्विर्वचनरूपः एवं वेकारेणित्वं दुर्लभं॰ नच लघ्वन्तांगोत्संसत्वेनेकारस्य लोपः सुल
भः अल्लोऽस्य परिभाषया निर्दिश्यमानपरिभाषया च तस्य अंगस्य पाश्र्वे श्रूयमाणोऽस्य अश्वयोणिस्त्रस्य लोपइत्यर्थो हिति भावः नन्वेवं रवह्रस्य
इत्यादौ रपरत्वं न स्यात्समुदायादेशत्वेपि वर्णादेशत्वाभावादित्यत आह अत्रवेति स्थानित्वेनेत्यस्य प्रसंगस्येकमित्यादिः भाष्ये संप्रमुग्धत्वादित्य
स्य विवेकानाकलनादित्यर्थः ननु द्विर्वचनेऽचीति रूपस्थानिवद्भावात्कथं शाब्दान्तरप्राप्तिरित्यत आह कार्यस्थानिवद्भावमिति भाष्ये रूप
स्य स्थानिवत्वादिति स्थानिवत्वेन रूपस्थानिदेशादित्यर्थः आरभ्यमाणा स्यान्न इति चिति चिकीर्षतीत्यादौ समुदायस्यादेशत्वेन संमोहान्न द्वित्वे कृते न स
निपरेऽजं तांगस्य दीर्घो न स्यादित्यादिदोषा अत्रापि बोध्याः अग्नेः सत्यं निटइति दोषस्तु न प्रकृतेइति बोध्यं ननु स्थानिवत्त्वादादेशादित्व
मत आह आदेशादित्यपदेशस्येति। अप्राधान्येनाप्यलाश्रयणे स्थानिवत्वनिषेधस्तत्र स्यादपि न इत्यर्थः अशास्त्रीयत्वाच्चास्य न दभाव
इत्यपि बोध्यं भाष्ये संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्येति प्रकृतिज्ञानस्येत्यर्थः अत एवाटिटदित्यत्रैव संप्रमुग्धत्वात्प्रकृतिप्रत्ययसमुदाय

(5)

ही

कै॰टी॰
४

स्येति। अत्र नोक्तं भाष्ये एकाच इति वेभिदितेत्यत्र भिदेर्द्वेवद्धिः प्रयोगात् उपदेशे एकाच्त्वाच्च ततः परस्येण्निषेधप्रसंग इत्यर्थः एका
चोंगादिति। अंगात्तु स्वविधानप्रतिबद्धतया एकाचो विहिता इत्यर्थेन न दोष इत्याशयः एवं चोपदेशग्रहणं अनुदात्तोपदेश एव संबध्यते न त्वेका
ज्ञेशोपि विभिन्नमतीत्यादेरो विहितविशेषणे नेवा दोष्यान्तरं इहनलेकाजिनीति भाष्यस्य यथाश्रुतत्वे हि अंतरंगत्वात्सनं नेड्विकल्पे ततावेव
सुभिड्न विनिवक्ष्यमाणा दीत्या समुदायस्यैवांगत्वेन विभिन्नतीत्यादवेकाचोंगोत्सरत्वाभावे नेडागमस्य दुर्वारत्वेनासंगतिः स्यादेव
उपदेशग्रहणस्यैकाज्विशेषणत्वे तु वेभिदितेत्यादौ दोषस्तरत्र स्य एवेति वाच्यं न नु द्विःप्रयोगपक्षे उच्चारणभेदेन शब्दभेदे माना
भावात्कथमनेकाच्त्वमत आह आद्यन्ति संख्यापो चेति भाष्येन नु चैकैकमपीति समुदायोवयवश्चेत्यर्थः अंगमिति। प्रत्ययवि
धानावधिरित्यर्थः इदमेव ध्वनयितुं सिषेवेत्यत्र वक्ष्यति एकैकस्मादप्यत्र सुप्तिङ्‌विधिरिति न त्वेकैकमत्रापरमित्येव। ते न हि ए
नस्य सर्वस्येतदीत्या व्याख्यानमिति ध्वनितं तदाह एकमेवेति एकस्मात्समुदायादथवा परस्मादवयवान्न एवं चोत्तरभिदेत्यस्याप्यं
गत्वं तस्यापि प्रत्ययविधानावधित्वात् तत्राह सोपपत्तोपपत्तिः सतपा एकदेशविकृतन्यायेन भिदित्यस्यापि अंगत्वं। एवं चापदेशोऽनु
दात्तात् एकदेशविकृतन्यायेन लोकदृष्टान्तमूलकेनैकाचो विहितत्वं। द्वोपि तत्रैकाच्त्वेपि वेभिदितेत्यत्र इट्प्रतिषेधः स्यादेवेत्यर्थः। एकैवांग
संज्ञेति। अयं भावः धातोरित्यनुवृत्तौ तस्य धातुत्वावच्छिन्नात्तदनुभवतीत्यर्थः तत्र तदवच्छिन्नं यद्यपि द्वयं समुदायोवयवश्चेति तथापि
प्रधानसान्निध्ये प्रधान एव कार्यप्रवृत्तेर्न्यायप्राप्तत्वेन प्रधानस्य समुदायस्यैव तद्विधानावधित्वेनावयवस्य। एवं हि शास्त्रमहीनं भव

श्री॰एम॰
४

(5A)

तीत्यस्य प्रधानन्यायेन दीर्घं न भवतीत्यर्थः ननु क्रियावाचकत्वस्याभ्यासेनैरर्थक्योऽभ्याससमुदाये एव पर्याप्तेर्धातुत्वमपि तत्रैवेति अव
यवविषयतास्य वक्तुमशक्यतया समुदायेऽवाकाशमात्रमित्यसंगतं द्वयोः संभवेत्येवं वक्तुं योग्यमिति चेन्न उत्तरखंडस्याहत्य वि
नाभ्यासमात्रार्थप्रत्ययाभावेन तत्स्यानैरर्थक्यं उत्तरखंडस्यानुप्रयोगाभावे हि न प्राग्वर्तिनः केवलस्याप्यर्थबोधकता यादृशत्वेना
र्थवत्त्वमेव येन नु रित्यादौ न ह्रस्वाभावे पुनरुत्तरखंडमात्रे णार्थबोधस्य मानत्वे उ तादौ क्वचित् यातिरित्यादौ विद्यानित्यादौ च विशिष्टप्रत्यया रेवत
त्पवार्थबोधदर्शनेनाभ्यासस्यार्थवत्त्वे शक्यमिति दिक् ननु ह्यवगवयवयोरित्यत्र कोऽवयववशादस्तन घटितसमुदायपरस्तेन पृथक्
समुदायावयवयोरित्यर्थोऽनत्ववयवयोः पृथक् प्राप्तिस्तत्र अभ्यासस्यानैरर्थक्याद्धातुत्वाभावेन प्रत्ययविधानावधित्वाभावात्सत्त्वेऽपि त
दादिष्वहणे न समुदायस्यैव प्राप्तिरिति पर्याप्तनासंगतिरिति बोध्यं न विग्रहशब्दादितित्वाल्लोपयलोपयोः कृतयोर्ग्रहः परे ईडिति दी
र्घप्रसंग इति भावः भाष्ये यहि गागिगमिति उक्तमीत्याग्रहे विशेषणान्तवोजरीगृहीत्यंगनकेवलाय हि॰। एकदेशविकृ
तन्यायेन्यायेनापि जरीगृहीत्यस्य वांगत्व न नु यहरीति भावः ननु ह्येकमिति। उक्तमाशयः ननु हि प्रयोगे जरीगृहीति ग्रहेरेव एक
देशविकृतन्यायेन वांगत्वमथीति रोयस्तस्य स्थाने वेत्यत्र हि विशेषणसामर्थ्यादीति अंगस्य विभक्तिविपरिणामेन विशेषणस्या
मर्थ्यादित्यर्थः अन्यथा गानिमित्तावयवस्येटईनषष्ठाव व्याख्यानेनेति भावः ग्रहेरत्र विषयेंगत्वाव्यभिचाराच्च। यथाश्रुतेति
सत्र श्रुतोनुपूर्वीकग्रहेर्विहितस्येटो दीर्घ इत्यर्थ इति भावः अत्र नु यङ्लुगन्तात् विहितो ननु ग्रहेरिति तात्पर्यं अन्यथा नित्यत्वात्

(८)

के॰ री
५

प्रसारणे गृहीतमित्यस्मात्सिद्धिशिनि एतज्ज्ञाप्यं केयट्योर्विहितविशेषणात्वेन एव तात्पर्यं एकाचोऽंगादितिवदस्यापि भाष्यस्यार्थे वक्तव्याख्या
यात्उचितत्वाच्च॰ किंच ग्रसिद्धत्वस्तत्रस्य भाष्यसंमतेत्वावस्थायामडागविनिपसेऽग्रहीष्टामित्यादौ दीर्घोनापत्तिः इदमेवाभिप्रेत्य के
यटेनयङ्॰लोपे चोक्तमिति ग्रहो लिटीति सूत्रभाष्यस्य प्रतीत्यनुयायाग्रहेर्विहितस्येस्सेव विहितविशेषणाद्यङ्॰लोपे दीर्घाभावसि
द्धिरिति उक्तं । भाष्यकृता तु अन्यत्रास्य दोषस्य सम्यक्परिहाराभिधानात्॰ अनादरेण न हानिकं नरेन छर्वचनादिति विहितमिति चोक्तं॰ दा
अत एव ग्राहितमित्यादौ न दीर्घः एवं च यङ्॰लुगंतेऽपरिहृतः प्रयोगोऽसिद्धत्व गृहीतः परस्येटो दीर्घो भवत्येव॰ अत एव स्थाने द्विर्वचन
पक्षे तान वकृत्वभेदः । न तस्येस्पितत्र दीर्घः प्रोप्रोत्यैव स्पष्टा निष्ठे नयकि चाघङ्लुगुन्नमवतन्ते द्वित्वप्रवृत्ते स्तदुक्तेरश्रयप्रवृत्तेश्च प्र॰
वीपरभाष्यच्छायायानसहेयहे रंगादित्यस्याभावलाभाच्चन एव स्था नोढ वचनपृश्नेएनहेयानुपन्यासाङ्गावनोत्तन तेसपास्त
न नन्वया समाउक्तरस्तकारस्यनपदास्त्विमतत्राह सिचेशिरिनहारेवेनिउक्तरंवडाइरेवेत्यर्थः ननु नात्र प्रकृतिप्रत्ययसंमोहः किंतु प्रकृ
तेरेवेत्यत आह प्रत्ययोज्ञानाभिनि प्रत्ययस्य चेति प्रकृतेस्तत्वज्ञानेन तन्निरूपितत्वात्प्रत्ययत्वाज्ञानेप्रत्ययस्यापि संमोह इत्यर्थः भाष्ये श्रीरामः
सुप्तिङ्॰न्तं पदमिति॰ परसंज्ञासूत्रे परे पदसंज्ञाहेय्यं सुबंतेतिङ्॰तं वतनु सुप्तिङ्॰न्तं यस्मात्ढधिस्तदादित्वेन विशेषयिष्याम इत्यर्थस्त ५
दाह सुप्तिङ्॰तं यस्य स्मात्हित्यादि॰ एकैकस्मादितिसमुदायादवयवाच्चेत्यर्थः समुदायेपेति लियात्स्य स्पावियय सप्तमीत्वेन पूर्वेहित्वेनतः
समुदायादवयवाच्चेत्यर्थः स्त्रिउत्सापाय । समुदायस्य धातुत्वे तु धातोरेव द्विः प्रयोगेणाभेदाग्रहात् इति बोध्यं॰ इत एव वारुचेराहतावेवेति तदाह

(6A)

परिहारांतरमिति। न त्वयं पूर्वोक्तार्थसंग्रहश्लोक इति भ्रमः कार्य इति भावः। लिङुत्सर्गसमनंतरमेवाद्धित्वमिति पक्षेऽपि दूषणांतरोद्धार इति तात्पर्यं पूर्वो
क्तार्थोपपादनपरमेवैतद्भाष्यं ननु द्वे के के स्मारश्यत्रेत्यस्योभयोरपि तत्त्वप्रत्यभिज्ञानादुभाभ्यामपि तिङ्द्वि शिशिरातिप्रसक्त्याभिन्नत्वपर्य इति परेण
केवेति उच्चारणक्रियाद्वयविशिष्टस्येत्यर्थः। उच्चारणाभेदेन घाणभेदाभाव इति भावः। एकैवांगसंज्ञेत्यपि प्रकृतविषयमेव द्वेमिति नेत्यत्र
तु कृतद्वित्वाद्यर्थं ताउस्तस्तानास्य परिहारस्य विषयः स एवेति निमलोपालोपयोः कृतयोरिति शेषः। उच्चारणभेदादिति उत्तरार्धं संख्या
पूर्वसंख्या निवर्तेयतो इति भावः। तस्त्रेति मिथ्येवेत्यत्र चत्वारमत्र भाष्यारूढार्थः योगतो विधानावधेः परोतावेव मोस्तु प्रिदेवयतो विहितो
माभ्रष्टनिराधारेव तद्भितीयेत्यर्थः आगंतुनामंते निवेशादिति न्यायात् द्वितीयोच्चारणस्यैव विधेयत्वात्। द्वितीयस्य प्रत्ययोत्पत्तिकाले
ऽभावात् आद्या आद्योच्चारणविषयाः कृतेतु द्वित्वे द्वितीयोच्चारणेनापर्यवोधार्थस्यासत्त्वं नेरपेक्षव्यवहारोऽपि। न त्वेवमद्वितीयोच्चा
रणाविषयतद्रूपेणाव्यवधानात्प्रत्ययपरत्वाभावः आय स्यैत आह रादिग्रहणं चेति समुदायपरत्वमिति उच्चारणक्रियाद्वयविषय
त्वेन समुदायव्यवहारः अजादेर्द्वि ननु वृद्धी हित्वपक्षे द्वे पूर्वे रागासिद्धत्वया सामर्थ्ये नद्वितीयस्यैव भविष्यतीति तत्रा
पि द्वितीयग्रहणं भ्रमनत्क्काह अजादेरिती नियमार्थं द्वितीयस्येत्यस्य नियमार्थत्वेना पित्वतो यानां द्वित्वं वारयितुं शक्य
नया पिनस्यवार्तिककृतादर्शावः न्द्राः संयोगादय इति सूत्रे नुहृत्तस्याजादेरित्यस्य इँद्री पिषती स्यादेरस्य द्वित्वनिषेधाभावाय पंचम्य दि
न्तत्वकर्मधारयपरत्वावश्यकत्वादिति भावस्तदाह तत्र व्याख्यानादिति ननु स्मुरुषः समानाधिकरणात्स्यादेककर्मधारययोग्यपदा

(७)

के॰टी॰
६

नोऽस्मात्साभावस्य सूत्रकारेणोक्तौ सिद्धत्वेपीह व्याख्यानात्कर्मधारयइतिभावः समासद्वयसंभवेन्याय्योयमित्याह । तत्रंगत्वाद्दे
तिनह्रीजेस्वपरार्थप्रधानत्वंपश्यामीति । एवंचश्रामत्वादितिहेतुरसंगतइतिभावः विशिष्टेतिनिवर्तकांतराभावविशिष्टेत्यर्थः प्र
याकारणोशिनिपरदेशास्येकेनाक्रांतत्वान्नैवद्वितीयस्यपरत्वंयोगात्तत्रविरोधइतिभावः । भिन्नफलत्वादितिसमानफलकत्वे
हिबाध्यबाधकभावइत्यर्थः नन्वद्वितीयत्वादित्यसिद्धोहेतुः कृतेपिप्रथमद्विर्वचनेद्वितीयस्यैकाचः सत्वात्तत्राहयस्येतिश्र
कृतद्विर्वचनकालिकाद्वितीयाज्झिराश्रयतइतिभावः प्राथम्यादिरत्वस्यापवादकत्वमव्याप्तकमेहेत्वभावादितिश्रानवेकाशत्वा
दितितद्बाधंविनाचारितार्थ्याभावादितिभावः द्वितीयत्वानिमित्तादितितत्रनिमित्तमनाविरहात्सत्वेद्वितीयत्वक्रियाहणमितिभावः
विशेषइति । द्वितीयविशेषइत्यर्थः भाष्येहृतेद्विर्वचनेइति ननुभ्यासस्येत्यन्नत्तु रूपेणेकाज्विशेषणमितिभावः पररूपेइति
श्रतेश्रादेशितिनुनस्पलिद्येवग्रहणे द्वयोरन्यतरग्रहणमितिपररूपात्त्रंद्वितीयद्वित्वेद्वयोरन्यतरग्रहणमितिभावः विपरीतक्रमः
कस्मादिति॰ एवंचचरदृशाहस्याद्वित्वेवाद्वितीयाद्विर्वचनमर्थवदित्यर्थः । ननुकृतेप्रथमद्विर्वचनेहलादिःशेषेचसन्नतइतिरत्वंकस्मा
न्नेसतत्राहश्रतरंगत्वादिति॰ इत्वंहीति । परस्पंतुवार्णत्वादंतरंगमितिभावः । सत्यपिचेति आसप्तमाध्यायसमाप्तेरंगाधिकारइतिप
रस्याकृतेप्यनित्यत्वादितिभावः । ननुइत्वोत्तरंद्वितीयद्विर्वचनात्प्रागभ्यासस्यासवर्णइतियण॰ आप्नोतीत्यतआहतत्रकृतेइतिने
यरोपइति । वस्तुतस्तुअभ्यासस्यासवर्णइतिसूत्रारंभसामर्थ्यात्तद्विषयेस्यानिवत्वाप्रवृत्तिरित्याहुःकृशोषेनिरूपयि

श्रीराम॰
६

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(7A)

ष्याम:। स्थूलोक्तसमाधानं तु चिंत्यं पूर्वत्रासिद्धेन स्यान्निवृत्तिरित्यवष्टभ्य भाष्ये सुवर्णपिंडग्रहणप्रत्याख्यानादित्याद्युक्तः मन्यन्त इति वार्ता
दीनामिति समानाश्रयविषयमिति मन्यन्त इति भावः। विशेषाभावादिति पदजन्यवर्णग्रहणत्याग्रवृद्धिग्रहणे लक्ष्ये लक्षणस्येति न्यायेनन
दोषइत्यन्ये वार्णादिति। समानाश्रयसूचनेनास्त्रति शितिनु निमित्तमिति भावः। यादेनेति सधिकारपाठे स्वेदेनेति बोध्यं। व्यक्ति
रिति व्यक्तिविशेषइत्यर्थः। न जातिरिति व्यक्तिसामान्यमित्यर्थः। नराहयान्वाहृतेइति। प्रथमस्य नादृशस्यैवग्रहणे नन तस्मा
दवर्णान्तरपरत्वाच्च द्वितीयत्वस्य द्वितीयस्यापि नादृशस्यैव ग्रहणमिति भावः। ननु प्रमाणस्य प्रयोजनानुवर्तित्वाभावान्ना
निष्टार्थेत्युक्तमत आह भाष्ये यथा चेतिन यानवष्टे भवतीति। जातिनिर्देश इति। मा भूत्वाक्ति विशेष निर्देश इत्यर्थः। अ
मस्यापि विरोधइति पक्षाश्रयणेन न क्रहानेन। धातुरूपत्व भेदात् प्यको विषयः। नन्वोदनसेकारव्यफलाभेदान्तत्र वाधेपि रूप
विशेषाख्यफलभेदासत्त्वे क्वचा वा यद्वा इतिचेन्नारथितं न जन्याकृतीनां मन्ने सत्त्वाविभेदाद्बाधानापत्तेः। अत्राप्यर्थाभिधानाख्यफ
लस्याभेदाच्च। अपरस्मादयोरिति एकापिपर्यन्तं त्राहित्याप्रयासैवं धि भेदाद्वियते। यस्मादे रित्वं भवति अपेत्यस्य चेति निभा
वसदाह एकस्मादीनि एवचरूतेप्रथमाद्विवचने द्वितीयद्विर्वचनस्य चारितार्थ्यापि यत्र यत्र द्वितीय द्विवचनप्राप्तिस्तत्रावश्यं प्रथम
द्विर्वचने प्राप्ते येन नाप्राप्तिन्यायेन वाधो यथा आरेरित्यनेनो यत्यस्येत्यस्य अन्यथा यस्मादेरपीत्वविधानेनादेरित्यस्य चारितार्थ्ये
नांत्यांशवाधकत्वं न स्यादिति तात्पर्येण न्विका च इत्युक्तं वो विधानेन तस्य तन्त्रिहृत्वा वपि ध्यं जनस्य तत्र शिरश्रेमानाभावे नन्त्रादि

(8)

कौ॰ टी॰ ८

यथाभूतस्येति एकाच इतिवद्बहुव्रीहिरिति भावः भाष्ये शासनात्सर्वस्येति । सर्वस्य प्रतिषेधशासनादित्यर्थः अत्रास्यनुमानमि
ति द्वितीयैकाच्त्वसहितजात्यादिधात्वतिरिक्तविषयमेकाच इतीति भावः नञ्प्रतिषिद्धमिति प्रायः हन्तेः प्रतिषेधो हन्त्याद्यर्थं किंतु मपिश
क्येनेत्यर्थः ननु न्द्रादीत्यत्र न दशानामग्रे हस्वादादिशाह्याद्यर्थोऽप्रसिद्धिरत आह न्द्राश्च नेआरभ्यश्चेतिनन्वादेनुरित्यादौ द्वितीयाद्वि
वचनाप्रवृत्तेः कथं प्रथमस्य न द्वाध इत्यत आह जादेरिति जात्युद्देशेनाविहितस्य जात्युद्देशेनैव न द्वाधकत्वं यथा हल्ङ्यादेः शोष इति
भावः अजादिसामान्येति द्वितीयस्येति करणेन तत्सूत्र हलन्तोऽजादिपदे बहुव्रीहिरेव संभवतीति भावः व्यपदेशिवद्भावेनाद्वितीयत्वादज
जादेरित्येवात्र द्वित्वमिति तु नेवाच्यं । द्वितीयस्येत्युपादानात् प्रथमद्वितीययोः सत्त्वायामेवाजादेरित्यस्य प्रवृत्तेः ननु नानेन नञ्
निषेधः क्रियत इति प्रतिषिद्धत्वादित्ययुक्तमत आह आदिरिति ननु व्यक्तिनिर्देशोऽकस्मात् विध्यक्तौ वेवशास्त्रप्रवर्तनेनेतिशा
स्त्रस्य व्यक्तेतरेऽप्रवृत्तिर्नेत्यादत आह जात्युपलक्षितेति जात्युपलक्षितसर्वव्यक्तिविषयकत्वाच्छास्त्रस्य न दोष इति भावः ननु
जातेः प्राधान्यं नोप न विशेष्यत्वं तस्या द्विरुच्चारणात्वया संभवात् किंतु जातिगतामेकत्वसंख्यां व्यक्तिष्वारोप्य प्रयोगः इत्येव तेन सकल
व्यक्तिसंग्रहसिद्धिः किंच तज्जात्युपलक्षितव्यक्तित्वमटाप्यस्येव एवं च कथमेतदिति चेन्न द्वितीयैकाज्समानाधिकरणजा
तित्वजातेराश्रयणान्न तु तरसमानाधिकरणाया अपीति तात्पर्यान्न हल्ङ्यादेः शोषेत्वादिहल्सत्त्वासमानाधिकरणभ्यासहल्त्वस्यैवने
तरनिवृत्तिः शेषपरत्वं स्यात् किं त्वभ्यासत्वस्यैवेति । अत्र च लक्ष्यानुसारिव्याख्यानमेव प्रमाणमिति बोध्यं । लोके जात्याश्रयणामु

श्रीरामः

८

पघास्यतिः यथायथामाह तेशितिभाष्येसर्वत्राग्रस्यणस्येतिग्रागंगंग्राममात्रेइत्यादिः सर्वस्यानाद्यस्येतिसर्वाभ्याससंबंधिनइत्यर्थः
सर्वस्येतिसर्वधातुसंबंधिनइत्यर्थः। अहलभ्यासइतिहस्त्योहलादिःशेषइतिसंहितापाठेऽहलितिविभज्यते। तत्राभ्यासस्येतिषष्ठ्यंतं
श्रूतमपिसामर्थ्यात्प्रथमयाविपरिणम्यतेतेनाभ्यासस्यसर्वस्यहलोनिवृत्तिः क्रियते आदिः शेषइत्यनेनतुयत्रादौहलः
संभवस्तत्रसोभ्यनुज्ञायतइतिभावः लोट्यानुसाशिष्टवोकंआख्यानोपेस्मेरमेवमुक्तेनन्द्रीः भाष्येकंडुरीनांत्नीयस्येतित्न
तीयस्यैकाचइतिप्रश्नः तत्रकंडुरीनांत्नीयैकाचोसंभवात्र हलिपसमुदायोरस्लुच्यते। उभेअभ्यस्तं सहभूतयोरितितद्व्याख्यानपरस
रायेह्रस्योरितिप्रत्येकंवाक्यपरिसमाप्तिन्यायात्तद्द्वयोईत्ने स्याताम् तः सहग्रहणमितिभावः नन्वनुदात्तेपरमेकवर्जमितिवचना
त्कथंद्वयोरुदात्तत्वमतआह स्यानुदात्तत्वेइति। एवंव्याख्यानेबीजमाह प्रधानवाचिनीति। प्रधानंउदात्तस्वरितोद्देश्यं वर्जयि
त्वाशिष्टमनुदात्तमित्यर्थः योगपद्यासंभवेहेतुमाह संख्यावचनइति। प्रसिद्धत्वात्तस्यैवग्रहणमितिभावः भाष्येपर्यायश्चे
तिअस्यवक्रमशःकाइतिशेषः उभयोरप्यप्राप्तेशितिभावस्तरेवाद एवंस्यनावहितियरयं विभेसाशनामिति। अविद्यमानोदा
त्तेलसार्वधातुकेपरेभ्यस्तानामादिरुदात्तइत्यर्थकेन अनुदात्तेचेत्यनेनेवसिद्धेरितिभावः एवमेकैकस्याप्राप्त्याप्यायेहविघि
तेनंसमर्थयितुमाह एवमित्यादितत्रसएवेतिविनिगमनाविरहादितिभावः जुमेशाहूस्यनारश्मा विशिशायहनित्वमानमाह
देहस्यनुहूसोतभाष्येविज्ञास्यतेइत्युत्तानस्यनादृशार्थकत्वंनलोकसिद्धमितिस्वचितंननुदेहत्यनुवर्तनाद्दयोरेवसंज्ञास्यात्ना

(९)

कै॰टी॰
८

न्यवराघ्यायेइति किंतु भेग्रहणेनान्यतआह द्धनेद्विर्वचनेइति। ननुईत्संनीत्यास्विवारणाय भेग्रहणंनावश्यकंअज्ञावत्तुन्निये
धन्तुस्वभावेषुमध्यापप्रथमभ्यस्तरूपाहंगानेअभ्यस्तरूपाद्वानोऽस्त्यर्थकरणेनादोषान्तइतिचेन्नउणंज्ञेर्यङ्॰लुगंतात्स्यर
स्यस्याहेरराद्यनापत्तेः अंगस्येत्यस्यषष्ठ्यंततपांगावयवस्येत्यर्थेनेवोचित्यात्तु॰जुह्विधावपिधातोर्विहितस्याभ्यस्तास्यरस्ये
त्यर्थस्येवौचित्याच्चअत्रएवनपूर्वपक्षसिद्धांतयोर्निर्दलनात्अनंतरंगत्वादिमिद्विर्वचनपात्रापेसत्वादभ्यासलोपस्वीकारसंनियो
गेनविधीयमानोवहिरंगइतिभावः अन्यथेत्यादेशापेक्षंचाश्रित्येत्यंतरंगत्वादित्यस्योपलक्षणत्वादित्यर्थस्तदाहप्रतिपदविधेरितितत्रावस्थं
प्राप्तेःस्यात्स्थादिति भावः अभ्यासलोपस्तुपृथगेवविधीयतेनेनतत्सोनिसंयोगेनेत्यभिमानः सत्रारंभादितिअन्यथाकृतणत्वस्य
द्वित्वेआणिणिषतीत्यादिसिद्धेस्तत्सूत्रानर्थक्यंस्पष्टमेवेतिभावः अकृतेनन हेनाश्रयणीफलाभावादाहनदाश्रयणेत्वितितत्रवर्णाश्र
यत्वादितिवाणींणगमितितुनसमानेत्स्थानिकत्वाभावादितिभावः एकादेशश्वेत्युक्तरंयद्यपीतिशेषः॰शाय्येप्राप्तिरित्यस्यतथापीति
शेषः शाबेवांतरंगत्वादिति। एकादेशस्त्वपरांतत्वविशिष्टपूर्वेमकारयणासन्निकमुक्तरंचापेक्ष्यतइतिवहुपेक्षत्वाद्बहिरंगइतिभावःसि श्री एम॰
द्धांतपूर्वपक्षयोराशयंदर्शयति॰तत्रशाब्दिति। पूर्वयोरकारयोरिति। अंतरंगत्वादिदमेवोचितंवस्तुतस्तुनत्रशादेत्यादिवोध्यंतदस्यंतोऽयं ८
यः सर्वनामस्थानेऽस्यतः पूर्वत्रपाणामेकादेशोक्तेउभयतआश्रयेणांतादिवद्भावाभावाद्घपवर्गाभावइतिहिसिद्धांतभाष्येवक्ष्यति॰
किंवतदापूर्वपूर्वयोःपरयोर्वैकादेशेनविशेषतस्तस्मात्परस्यविभज्यान्वाख्यानमितिपूर्वपक्षः अन्यथासिद्धांतइतिवक्तुमुचितं।

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

भाष्येऽत्र नन्तइत्युभयोः शेषइति। अतएव प्रतीतिपृथत्वंतीत्याशयेनाशयः भाष्ये एकादेशाइतिपूर्वयोरेकादेशोङ्गतेनानुस्वारे ऐऔकादेशस्य संप्र
धारणेनेतिबोध्यं नमुम्प्रतिषेधेङ्गते ऽङ्गते च ह्रस्वोरेकादेशोङ्गते शानुस्वारे ऐऔकादेशस्य संप्रधारणे रयोरेवपररूपमितिकथमनित्यत्वमिति
आह मितइति। तत्राह्गतेनः त्वपवस्यःकारस्य पररूपमिति मितत्वं तेनुवर्णग्रहणं पिङ्क्षित्परागमाइति न्यायांगीकारात्नाव यवस्यैत्व भि
मानः इदमपि अंगवयवोमित्स्यमुपेत्य वस्तुतामस्य विहितत्वे न उपपत्तिसिद्धांतः इदमेव ध्वनयन्नित्यत्वमेकादेशस्य कापि उपसं
हारे नित्यत्वाद्वांतरंगत्वाच्चैकादेशाइतिवक्ष्यतिभाष्यकृत्। अतएव प्रतीतिर्थनित्याहीननुम् निषेधः भाष्ये एकादेशोङ्गतेनास्तिव्यव
धानमिति। एवं च जुस्भावेन व्यवधानं अतिभावा प्राप्ताभावेकादेशोङ्गते व्यवधानगाभावान्नभविष्यतीत्यसंगतमिति भावः एतदुत्तरमेकादे
शः पूर्वविधौ स्थानिवद्भवतीति व्यवधानमेवेति कृचिस्माठ… ऽयंघः एवंहि जुस्भावाप्राप्तावंतिभावे कृते व्यवधानाभावान्न
भविष्यतीत्यस्य स्थिरत्वात् किं पुनः कारणमित्याशयमयं यानुस्या … केचेदमिष्यपदेशं सहावचायद्रत्या हेरण्य संगत्यापत्तिरितिबोध्यं।
अंतिरेकादेशोनावदिति। सनकामश्रावकामपोरेकादेशमित्यः यदि तदुत्तरमितिः स्यावजुस्मावाधः संभाव्येनततः आगेवत्वेनात्र
यारणामकारणांपररूपेव्यपवर्गाभावाज्जुसोप्राप्तिरितिभावः नपुनस्तावत्स्येवेति। एकादेशात्प्रागेवेत्यर्थः उपदेशिवद्वचनात्
प्रान्तस्यांतरंगत्वमितिभावः अंतिभावेनेति सर्वेसर्वपदादेशाइतिन्यायेव स विशिष्टस्यात्वविशिष्टआदेशाद्य अद्यइति भावः अस्त्वे
तिभावेचतिअजुसिस्याहोप्रक्रियालाघवाय विशिष्टएव स्यादिति भावः केचित्तुअञ्जुसिसत्रेकारस्योच्चारणार्थत्वेनात्रेनो

(10)

कै॰टी॰
९

लोपे वा शिष्टस्याप्यल्विधित्वेन स्थानिवत्त्वाभावादितोऽसत्त्वाभावान्नुसोऽप्राप्तिरिति सकृदेव एत्वं यथा वा पदाश्रीति त्राडुः पूर्वं हीति
हिशब्दस्य चितमप्यवासेनाप्रवर्त्तेरक्त्रोन्याय्यं परत्वे यति विकल्पेणैवाणामिति। यथाकु भण्यणो विषयान्तरे साक्रुकाराशस्याकारोऽनेन्यः
संदेहान्न पूर्वं प्रवृत्तिः केसुनेः संदिग्धत्वात्तत्र प्रथितिं पूर्वं प्रवृत्तेरिति तेन सुक्के विषये ए प्रवृत्तिः। इतिन्याय्यं त्वमिस्पर्यः प्रकल्प्य
वेत्सरस्य विषये स्पर्शात्विनियमान्स्म प्रसार राणादि। इत्तुं संप्रसारणा इति सूत्रस्य भाष्य विरुद्धमिति तिते च वस्फुटं भविष्यति स
हग्रहणावादीये सेनुदुस्मास वपिजुसोपव्यारस्य विषयत्वे न पूर्वमिति भावः प्रवृत्तिमाहनस्वल्पयीति पूर्वं स्मारयीति। अत एव त्र
स्त्रियिया नित्यार्णेन दोषः अथ यो भेग्रहणस्य सहार्थत्वमप्राप्तिरिति। बाधकन्नू तश्चिप्रत्यय ख्यानुमाह भाष्यकथं चे केकस्येति॰
इहापि नार्थ इति लस्थानुजीधातुक्करीत्या अभ्यस्तानामादिः। स्यस्य स्वपरस्यार प्रवृत्त्या विपर्ययाच्चात्र समुदायेवाक्यपरिसमाप्तिन्या
यस्यैवाश्रयणं॰ पर्याय कल्पनापेक्षपात्रेतन्न्याय्याश्रयणात्कल्पनेवीधिनेतिभावः जक्षित्यादयः षट्सोमागारीत्वासमभ्यग्रहण
स्यानावश्यकत्वाहाहजक्षिति जिराइश्चिनिननुवेद्यतः स्वत्रानिनप्रभृतवृत्तेद्वन्हादेशस्यासिद्धेः किमभ्योस्त संज्ञयेत्यतेआह अ
भ्यस्तानामादिरतिस्वरितत्वं प्रसज्येतानित्यशाद्याकारस्यत्स्यथः सिद्धेत्येषु दात्रोरनुदात्त स्येतिस्वरितस्येवेष्टत्वात्स्वित्यमिदं तत श्रीराम
स्माद्देशश्लेकारेउदात्तश्रवणं न स्यात्स्त्येकत्वं कुर्युके ननु जभित्यादिश्यः पूर्वमेवाभ्यस्तपरशनइत्यनेन तस्माडः शास्विनिपठ्य ९
तइतिकथं तस्याभ्यस्तसंज्ञास्यातस्त्राह वेवीङ्जेनं नरामिति ननु मेत्रे याहयो वेवीङः नंतरं यसभणास्लिस्वप्रेवशासां ताविति प

(10A)

६

ठं तो निघ्नासिवशी इति त्र्ययोरेव कथमनुपादानमत आह षसशास्तीति ॰ केचित्तु षसस्तीनिपठं तिशास्तीति पाठे पि न दृष्टयथा त्वं तरामि
दंतकारान्त मिति न्न ॰ किं तु शासुश्चित्तिपानिर्देशाद् तिमतेन भाष्यमित्याह अन्ये त्वाङुः शिति शासइति आ उः शास्त्विति अनुदात्ते तइत्यर्थः
ननु वशो इच्छा दसेत्वत्र पिभागु रिरित्या दिप्रयोगाणां का गति मत आह वशो रिति ॥ यदि भाष्यवार्त्तिककारौ अमाणं तर्हि साधुरेवप्रयोग
इति भावः ॥ निघाते ने तिशेषनिघाते नेत्यर्थः अनुदात्ते चेति ॥ अनेनानुदात्तत्वे हि अविद्यमानोदात्तत्वलक्षणं एवं धातुक मस्तीत्यभ्यस्त
लितत्वप्रवृत्तिः स्यादिति भावः अङ्गित्त्वोरिस्यनुवृत्त्येति ङ उ ॰ असंयोगोच्चारितः अनिषेधविधानसामर्थ्यादिति भाष्य स्वार स्यात्तत
त्रावृत्तीति नानुवृत्तेतइत्यमेनापशितेपेति ॰ क्लिपिरुहादिष्वेव शिरतदूपनेत्यर्थः स्मीपवाचीतिएवचात्तद्गुणसंविज्ञानवद्व्रीहिणा
जभे ॰ परेषट्ज क्षिश्चेति समानासिद्धासंज्ञेत्यर्थः लिटिधातोः भाष्ये ईहांचक्रे इति आमं तो न धातु रिति भावः विघट ए इति ॥
श्रुवोलिघ्ययैचिच्छं इत्युभयथेति सार्वधातुकत्वान्न श्रुव श्रृभावः श्रुश्च ॥ अत्र विकरणानां समुदायो लिङ्परान धातुरिति
तदीयग्रथ्यमेकाचानाद्वित्वमिति भावः ननु त्रत्राप्येतदावश्यक मत आह जुगुप्सिषत इति ॰ स्वार्थसनं तो द्विज्ञासन् उन स्त्र सूउं ता
त्सनूतदाद्विर्वचनमिति ॥ लक्षणभेदादित्यर्थः एवं पडं नात्सन्यपि लक्षणभेदो द्रष्टव्यः अत एवस्तौतिएयोरिति सूत्रे भाष्ये पडं
नात्सनि सोषुयिषत इति प्रयुक्तं संगच्छते ॥ प्रकृतसूत्रे प्रयोजनाभावपरं तु भाष्यमिति भावः अभ्यास प्रतिषेधानर्थक्यं द्वहसिवा
वचनादिति भाष्यवार्त्तिकस्वारस्याल्लोके एषा प्रयोगाणामसाधुत्वं कल्पयितुं युक्तमित्यपरे भाष्ये तद्देतद्वानुग्रहणमिति ॥ अयं भावः

(11)

कै·टी·
१०

धात्वनुग्रहणाभावे लिटी त्यादिप्रत्यये मे काचत्वविशेषणं स्यात्त्र्याच पपाचेत्यादावेव स्यान्न तु जजागारेत्यादौ· तस्य लिट्परत्वाभा
वादिति भावः ॥ विभक्तिविचारस्य प्रकृतानुपयोगादाह विभक्तीति सप्तमी पक्षे पि तदंतविधिर्दुर्वार इत्यत आह परिभाषेयं स्था
नादिति· एवं च सति परे इत्यर्थेन स्मादित्यवधिसाकांक्षत्वेन यस्माद्विहितस्तस्मादित्यन्वये प्रत्ययविधौ चापं च म्यादशिनि
ष्ठे धात्वंतदंतविधिरिति भावः अर्थं कृतविशेषस्यु स्यात्तत्वुक्ते … त्वाप्यनुपपत्तेराह हलस्य गतेति । इंते श्वेतेरिहंते हत्वरस्य पड·
ई ३ति पठेइदं· नन्वपधालोपे ऽनचकत्वात् … द्विर्वचनाप्र संगएवेत्यत आह गमनोति· ननु सन्यङ· तस्याद्विर्वेईट· कार्यित्वेन निमि
त्तत्वाभावात्कथमुपधालोपस्य स्यानिवत्त्वमत आह सतीति … भाविता मात्रेण निमित्तता एवं च इड्द्विः शिष्टस्य प्रत्ययमेकाच्त्वा
भावेन नत्स्यादित्वं नस्यादिति भावः यङ्यपीति । एवं च इकारस्य द्वित्वनिमित्तत्वाभावात्स्यानिवत्त्वं दुर्लभमिति भावः प्राप्तिमात्राश्र
येणेति । परिस्थानिवत्त्वं नस्यात्तस्मादेवेटो द्विर्वचननिमित्तकाल्यनिकप्राप्तिमात्राश्रयेणेत्यर्थः भाष्ये सप्तमी पक्षे दोषांतरमाह अ
नुदात्तविशेषणं चेति अनेकाच्ह्रत्वपरविशेषणं चेदित्यपि … विहितविशेषणपक्षे दोषाभावात् सनइट् आत्मनेपदे इति अन्यथा श्रीएम:
आइक्षितेद्वित्वे नप्राप्यमाणे एकाच्त्वस्य बाधितत्वात्सन स्यादिति भावः षष्ठीपक्षे पि दोषएवेत्याह सनंतस्यापीति नन्वेवं आ… सति
परस्मैपदित्वादियम् माणाइतिन सिध्यतीत्यत आह अशोतेरिति । द्विर्वचनमिति अशेरशस्य अश इति भावः अदिहमाणाइति अश्र १०
सइत्यत्र पूर्वत्रासिद्धीयमित्यस्य क्वित्वे कर्तव्ये हलं तेचतत्राश्रयत्वस्य कार्ये न रेकत्रैवे ऽसिद्धत्वं नेत्यर्थो लुङ्ह्रो अश्रुशिनिचुत्वे सन्यतइतीत्ते

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com